ष्वद, क स्वादे। छेदे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) स्वादो रसोपादानम्। क, स्वादयति चौरं लोकः। इति दुर्गादासः॥

ष्वद, ङ प्रीतिलिहोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) प्रीतिः प्रीतीकरणम्। लिट् रसोपादानम्। ङ, अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा। इति श्रीहर्षः। इति दुर्गादासः॥

ष्वन्ज,औ जि ङ आलिङ्गे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।)वकारयुक्तादिः। आलिङ्ग आलिङ्गनम्। औ, स्वङ्क्ता। जि, स्वक्तोऽस्ति। ङ, स्वजते युवतीं युवा। परिष्वजति पाञ्चालो मध्यमं पाण्डुनन्दनमिति गणकृतानित्यत्वात्। इति दुर्गादासः॥

ष्वप, औ घ लु जि शये। इति कविकल्पद्रुमः॥ (अदा०-पर-अक०-अनिट्।) वकारयुक्तमूर्द्धन्यादिः। औ, अस्वाप्सीत्। घ लु, स्वापिति। जि,सुप्तोऽस्ति। शयः शयनम्। इति दुर्गादासः॥

ष्वर्त्त, क गत्याम्। तङ्के। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-तङ्के अक०-सेट्।) वकारयुक्तमूर्द्धन्यादिः। तङ्को दुःखेन जीवनम्। क, स्वर्त्तयति जनो गच्छति दुःखेन जीवति वेत्यर्थः। असिष्वर्त्तत्। इति दुर्गादासः॥

ष्विद,लृ औ य आ जि खिदि। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-अनिट्।) लृ, अस्विदत्। औ, स्वेत्ता। य, स्विद्यति। आ, स्वेदितं स्विन्नं तेन। जि,स्विन्नोऽस्ति। खिदीति मोहस्नेहमोचेष्विति वोपदेवः। गात्रप्रचरणे इति प्राञ्चः। न च स्विद्यति तस्याङ्गमिति हलायुधः। इति दुर्गादासः॥

ष्विद,जि आ ङ लृ मोहस्नेहमोचेषु। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-अक०-सेट्।) जि, स्विन्नोऽस्ति॥ आ, स्वेदितं स्विन्नं तेन। ङ, स्वेदते तिलः तैलं मुञ्चति इत्यर्थः। लृ, अस्विदत् स्नेहः स्निग्धीभावः। इति दुर्गादासः॥

---

## स

स, दन्त्यसकारः। स तु व्यञ्जनद्वात्रिंशवर्णः। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम्॥ (तथाच शिक्षायाम्। १७।

"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥")

तत्स्वरूपं यथा,—

"सकारं शृणु चार्व्वङ्गि शक्तिवीजं परात्परम्।
कोटिविद्युल्लताकारं कुण्डलीत्रयसंयुतम्॥
पञ्चदेवमयं देवि पञ्चप्राणात्मकं सदा।
रजःसत्त्वतमोयुक्तं त्रिविन्दुसहितं सदा॥"

इति कामधेनुतन्त्रम्॥ * ॥

अस्य लेखनप्रकारो यथा,—

"कुञ्चिता वामतो दक्षगता च गोक्षतिरूर्ध्वः।
पुनरूर्द्ध्वंगता तासु वह्निचन्द्रदिवाकराः।
मात्रा भवानी विज्ञेया ध्यानमस्य प्रचक्ष्यते॥"

अस्य ध्यानादि।

"शुक्लाम्बरां शुक्लवर्णां द्विभुजां रक्तलोचनाम्।
श्वेतचन्दनलिप्ताङ्गीं मुक्ताहारोपशोभिताम्॥
गन्धर्व्वगीयमानाञ्च सदानन्दमयीं पराम्।
अष्टसिद्धिप्रदां नित्यां भक्तानन्दविवर्द्धिनीम्॥
एवं ध्यात्वा सकारन्तु तन्मन्त्रं दशधा जपेत्॥
त्रिशक्तिसहितं वर्णं आत्मादितत्त्वसंयुतम्।
प्रणम्य सततं देवि हृदि भावय सुन्दरि॥"

इति वर्णोद्धारतन्त्रम्॥*॥

तत्पर्य्यायः

"सो हंसः सुयशा विष्णुर्भृग्वीशश्चन्द्रसंज्ञकः।
जगद्वीजं शक्तिनामा सोऽहं वैशवती भृगुः॥
प्रकृतिरीश्वरः शुद्धः प्रभा श्वेता कुलोज्ज्वलः।
दक्षपादोऽमृतं ब्राह्मी परमात्मा परोऽक्षरः॥
सुरूपा च गुणेशो गीः कलकण्ठो वृकोदरी।
प्राणाद्याश्च पुरादेवो लक्ष्मीः सोमो हिरण्यपूः।
दुर्गोत्तारिणि सम्मोहाज्जीवो मूर्त्तिर्मनोहरः॥"

इति तन्त्रम्॥

सं, [म्] व्य, शोभनार्थः। समार्थः। सङ्गतार्थः। प्रकृष्टार्थः। इति मेदिनी॥ उपसर्गविशेषः। अस्यार्थाः यथा। सम् प्रकर्षाश्लेषनैरन्तर्य्यौचित्याभिमुख्येषु। इति मुग्धबोधटीकायां दुर्गादासः॥

सः, पुं, ईश्वरः। सर्पः। इति शब्दरत्नावली॥ पक्षी। इत्येकाक्षरकोषः॥ विष्णुः। यथा। सः स्यादिष्णौ हरे सर्पे। इति भरतैकार्थसंग्रहः॥ पूर्व्वोक्तिपरामर्शकः। से इति भाषा। तच्छब्दस्य प्रथमैकवचननिष्पन्नः। यथा भट्टिः। १। २।

"सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट
पितॄनपारीत् सममंस्त बन्धून्॥"

समासपूर्व्वपदत्वे सहार्थः। यथा। समात्कः। क्वचित् समानार्थश्च। यथा। „सरूपः। इति व्याकरणम्॥

संग्राही, [न्] पुं, संगृह्णातीति। सं+ग्रह+णिनिः।) कुटजवृक्षः। इति राजनिर्घण्टः॥ धारके, त्रि॥ (यथा, सुश्रुते। १। ४५।

"दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत्॥" संग्रहकारके च। यथा, कामन्दकीयनीतिसारे। ४। १०।

"प्रख्यातवंशमक्रूरं लोकसंग्राहिणं शुचिम्।
कुर्व्वीतात्महिताकाङ्क्षी परिवारं महीपतिः॥"

संज, क्ली, पीतकाष्ठम्। यथा,—

"जायकं ऋायकं संज्ञं प्रचेलं प्राविरः पुमान्।
कालीयकञ्च कालानुसार्य्यञ्चाथ समर्थकम्॥"

जायकादिसमपीतकाष्ठे। इति शब्दचन्द्रिका॥

संज्ञः,त्रि, (सम्यक्प्रकारेण जानाति यः। सं+ज्ञा+कः।) लग्नजानुकः। यथा,—

"प्रज्ञुः प्रगतजानुः स्यात् प्रज्ञोऽवैव च दृश्यते।
संज्ञुः संहतजानुश्च भवेत् संज्ञोऽपि तत्र हि॥"

इति साहसाङ्कः। इत्यमरटीकायां भरतः॥

संज्ञपनं, क्ली, (सं+ज्ञा+णिच्+ल्युट्।) मारणम्। इत्यमरः॥ (यथा, भागवते। ४।५।२२।

"दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे।
यजमानपशोः कस्य कायात्तेनाहरच्छिरः॥")

विज्ञापनञ्च॥

संज्ञप्तिः, स्त्री, (सं+ज्ञा+णिच्+क्तिन्।)मारणम्। इति हेमचन्द्रः॥ विज्ञापनञ्च॥

संज्ञा, स्त्री, (सं+ज्ञा+भावे अङ्।) चेतना। (यथा, कुमारे। ६। ४४।

"रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्य्ययः॥")

बुद्धिः।(ज्ञानम्। यथा, भागवते। ६। ७। १७।

"गुरोर्नाधिगतः संज्ञां परीक्षन् भगवान् स्वराट्।
ध्यायन् धिया सुरैर्युक्तः शर्म्म नालभतात्मनः॥"

तथा च गीतायाम्। १। ७।

"नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमिते॥"

नाम। आख्या। (यथा, मनुः। ८। १३१।

"लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि।
ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः॥")

हस्ताद्यैरर्थसूचना। हस्तभ्रूलोचनादिभिः प्रयोजनस्य ज्ञापना। इत्यमरभरतौ॥ (यथा कुमारे। ३। ४१।

"मुखार्पितैकाङ्गुलिसंज्ञयैव
मा चापलायेति गणान् व्यनैषीत्॥")

गायत्री। सूर्य्यपत्नी। इति मेदिनी॥ (यथा, मार्कण्डेये। ७७। १।

"मार्त्तण्डस्य रवेर्भार्य्या तनया विश्वकर्म्मणः।
संज्ञा नाम महाभाग तस्यां भानुरजीजनत्॥"

अस्या विशेषविवरणन्तु तत्रैवाध्याये द्रष्टव्यम्॥)

संज्ञासुतः, पुं, (संज्ञायाः सुतः।) शनिः। इति केचित्॥

संज्ञुः,त्रि, (संहते संलग्ने जानुनी यस्य। प्रसंभ्यां जानुनोर्ज्ञुः। ५। ४। १२९। इति ज्ञुः।) संहतजानुकः। इत्यमरः॥

संज्वरः, पुं, (संज्वरयतीति। सं+ज्वर+णिच्+अच्।) अग्निजतापः इत्यमरः॥ (यथा, कथासरित्सागरे। ५५। ६३।

"कदलीपत्रपवनैर्वीज्यमानां सखीजनैः।
पाण्डुक्षामामभिव्यक्तस्मरसंज्वरलक्षणाम्॥")

संयः, पुं, कङ्कालः। इति शब्दचन्द्रिका॥

संयत्, पुं, स्त्री, (संयम्यतेऽत्रेति। सं+यम्+क्विप्। "गमादीनाम्।" ६। ४। ४०। इत्यस्य वार्त्तिकोक्त्या मलोपः। तुक्।) युद्धम्। इत्यमरभरतौ॥ (यथा, रघुः। ७। ३९।

"उत्थापितः संयति रेणुरश्वैः
सान्द्रीकृतः स्यन्दनवंशचक्रैः॥")

संयतः, त्रि, (सं+यम्+क्तः।) बद्धः। इत्यमरः॥ (यथा, रामायणे। १। १०। २५।

"मायामिव परिभ्रष्टां हरिणीमिव संयताम्॥"

कृतसंयमः। यथा ब्रह्मपुराणम्।

"यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे।